# Kartavirya Vimshati Aksharamantrah

# કાર્તવીર્યવિંશત્યક્ષરમન્ત્રઃ

## Document Information

Text title : Kartavirya Vimshati Aksharamantrah

File name : kArtavIryaviMshatyakSharamantraH.itx

Category : deities_misc, viMshati, mantra

Location : doc_deities_misc

Proofread by : Manish Gavkar

Description/comments : Thanjavur Sarasvati Mahal Series No. 568 kArtavIryArjuna-upAsanA paddhatiH

Latest update : October 28, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 28, 2025

*sanskritdocuments.org*

# Kartavirya Vimshati Aksharamantrah

# કાર્તવીર્યવિંશત્યક્ષરમન્ત્રઃ

શ્રીગણેશાય નમઃ ।
ધ્યાત્વા પૂજામારભેત્ ॥ તસ્મિન્નાદૌ વૈસ્મવમ્ ॥

પીઠં તત્પૂજને નેત્રાદૌ સ એવ ક્રમ ઉચ્યતે ॥

(સ્વવામભાગે)ગું ગુરુભ્યો નમઃ ।
પરમેષ્ટિગુરુભ્યો નમઃ । પરાપરગુરુભ્યો નમઃ ।
(દક્ષિણભાગે)ગં ગણેશાય નમઃ ।
સરસ્વત્યૈ નમઃ । દૅં દુર્ગાયૈ નમઃ । ક્ષં ક્ષેત્રપાલાય નમઃ ।
(ગૃહમધ્યે)વં વાસ્તુપુરુષાય નમઃ ।
મં મણ્ડૂકાય નમઃ ।
(પીઠમધ્યે)કાલાગ્નિરુદ્રાય નમઃ । કૂર્માય નમઃ ।
આધારશક્ત્યૈ નમઃ ।
(ઇત્યભ્યર્ચ્ય )ૐ – દ્વીપાય નમઃ । ૐ રત્નમણ્ડપાય નમઃ ।
ૐ કલ્પવૃક્ષાય નમઃ । ૐ રત્નવેદિકાયૈ નમઃ ।
ૐ રત્નસિંહાસનાય નમઃ । (ઇત્યભ્યર્ચ્ય )
આગ્નેયાદિ પીઠપાદેષુ ધર્માદીંશ્ચ ચતુર્દિક્પાલકાન્ ।
પીઠગાત્રેષુ પૂર્વાદિમધર્માદીંસ્તથૈવ ચ ॥ ૧॥

કર્ણિકાયાં તથાઽનન્તે કન્દં ॥ સરોરુહમ્ ।
પત્રાણિ કેસરાંશ્ચૈ કર્ણિકાઞ્ચ તથા યજેત્ ॥ ૨॥

તારાકૈઞ્ચવર્ણપ્ ॥। દુત્રિમણ્ડલમ્ ।
ગણત્રયં ચ સત્વાદિ તતશ્ચાત્મચતુષ્ટયમ્ ॥ ૩॥

માયાતત્વં કાલતત્વં વિ ॥। પરં તથા ।
એકૈકોપરિ સમ્પૂજ્ય તતો શક્તિં યજેન્નવ ॥ ૪॥

વિમલોત્કર્ષિણી જ્ઞાનાક્રિયાયોગશ્ચ પઞ્ચમી ।

પ્રજ્ઞાસત્યાન્તયેશાનાનુગ્રહા નવમી પરા ॥ ૫॥

સર્વાદૃષ્ટેષુપત્રેષુ કર્ણિકાયાં યજેત્ક્રમાત્ ।
ચતુર્ધા નવધા યુક્તૈઃ સ્વૈસ્વૈરેવ ચ નામભિઃ ॥ ૬॥

કર્ણિકાયાં યજેત્પશ્ચાત્ પીઠમન્ત્રેણ મન્ત્રવિત્ ।
ૐ નમો ભગવતે વિષ્ણવે સર્વભૂતાત્મને વાસુદેવાય
સર્વયોગાત્મને યોગપીઠાત્મને નમઃ ।
અનેન પુષ્પાઞ્જલિં દદ્યાત્ ।
ઇતિ સમ્પૂજિતે પીઠે દેવીમાવાહ્ય પૂજયેત્ ।
અથ દેવપીઠે યન્ત્રં સ્થાપનીયં
ચૈતન્યવિગ્રહં દેવં સ્થિતં હૃદયપઙ્કજે ।
શ્વાસમાર્ગેણ સતતં ચિન્તયેત્કુસુમાઞ્જલૌ ॥ ૧॥

પાદુકામુદ્રયાનીય મૂર્તૌ સંયોજ્ય સિદ્ધયા ॥

તત્ર પૂજા ક્રમઃ । આવાહનાદિમુદ્રાઃ
પુષ્પાક્ષતાદિભિઃ પૂર્વદિક્ક્રમેણ પૂજયેત્ ।
પૂર્વે ચોરમાર્યૈ નમઃ ।
દક્ષિણે સુરાર્યૈ નમઃ ।
પશ્ચિમે અરિમાર્યૈ નમઃ ।
ઉત્તરેતન્મદવિભઞ્જિકાયૈ નમઃ ।
સ્ફટિકાખડ્ગચર્મધરા વીરા સર્વાભરણભૂષિતાઃ
ઈશાગ્નેયનૈરૃત્યવાયવ્યેષુ દુઃખનાશનમ્ ।
દુષ્ટનાશના દુરિતનાશના આમયનાશના
રક્તવર્ણા બાણબાણાસનધરા
સર્વાભરણયુક્તાઃ ઈશાન્યાદિષુ
અષ્ટ દિક્ષુ ક્ષેમઙ્કરીવશ્યકરી શ્રીકરી ચ યશસ્કરી
આયુઃકરી પ્રજ્ઞાકરી વિદ્યાકરી ધનકરી
એતાસ્સિતપ્રભાવરદામ્બુજધરારત્નાંશુકપ્રાવરણા હરકુણ્ડલોલ્લસિતાઃ ।
હૈહયનાથમનોજ્ઞા ધ્યાયેત્સૌન્દર્યલસિતાઃ પ્રમદાઃ ।
અથ ઇન્દ્રાદિ દિક્પાલાન્ પૂજયેત્ ।
પશ્ચાત્ નવાર્ણવેન ।
આવાહનાર્ઘ્યપાદ્યાચમનીયમધુપર્કસ્નાનવસનાભરણ-

ગન્ધપુષ્પધૂપદીપનૈવેદ્યચન્દનં સ્વાગતમ્ ।
અગરુ શ્રીખણ્ડં ચન્દનૈરર્ચિતાકૃતિમ્ ।
આલિપ્તં ભક્ત્યા રાજેન્દ્ર દદાતિ પરમેપ્સિતમ્ ।
મલ્લિકામાલતીજાતીકેતક્યાશોકચમ્પકૈઃ ।
પુન્નાગનાગબકુલૈઃ પદ્મકૈરુત્પલાદિભિઃ ।
એતૈરવ્યૈચ્ચકુસુમૈઃ પ્રશસ્તમ્પૂજનં કરૈઃ
નોગ્રગન્ધીનિ પુષ્પાણિ નાગન્ધં ન ચ કણ્ટકમ્ ।
કણ્ટકીનામપિ ભુક્તં જલજં ચ વિશેષતઃ ।
સુગન્ધમપિ યદ્ધાન્નરક્તં ચ કદાચન ।
પાટલી ।
કુડ્મલી ।
શાલ્મલી ।
શિરીષ કરવીરજપાકુસુમાનિ ।
પુષ્પાભાવે પત્રાણિ ।
અપામર્ગઃ । ભૃઙ્ગરાજઃ । ખદિરઃ શમી । છના । બિલ્વઃ ।
તુલસી । સર્વાભાવે દૂર્વાઙ્કુરાઃ । જટામાંસી । ગુગ્ગુલઃ ।
દેવદારુ । શર્કરા । કર્પૂરઘૃતમિશ્રિતધૂપઃ । દીપસ્થગુડખણ્ડ-
વિમિશ્રિતમન્નં નૈવેદ્યમ્ । મન્ત્રહીનમિતિ વન્દનમ્ । સ્વાગતં પ્રાર્થના ।
અર્ઘ્યપાદ્યાચમનં મધુપર્કાચમનાન્યપિ ગન્ધાદયો નિવેદ્યાન્તાઃ ।
પઞ્ચોપચારાઃ પ્રકીર્તિતાઃ । ઉપવીતં શ્વેતં ઇતિ પૂજનમ્ ।
સર્વેષામેવ મન્ત્રાણાં સ એષઃ ક્રમ ઉચ્યતે । ન્યાસં ધ્યાનં
તતો પૂજાજપસ્તદનન્તરમ્ ।
અથ મન્ત્રઃ ।
ૐ પ્રોં પ્રીં ક્લીં બ્લૂં આં હ્રીં ક્રોં શ્રીં
હું ફટ્ કાર્તવીર્યાર્જુનાય નમઃ । જપાદૌ અન્તે ગાયત્રી જપઃ ।
એવં કૃત્વા જપેલ્લક્ષં સમ્યતાત્મા જિતેન્દ્રિયઃ ।
મન્ત્રવર્ણભેદઃ ।
ક્લીં ક્લેશકરં ભ્રૂં ભીતિકરમ્ ।
આં આકર્ષણકરમ્ ।
હ્રીં ઉન્માદસ્તમ્ભનમોહનં ચ ।
ૐ સર્વસિદ્ધિદમ્ ।
ક્રૌં મારણે ।

ફ્રૌં સ્ફોટને શ્રીં શ્રીપ્રદમ્ ।
ઘ્રીં વિદ્વેષણે
અયં મન્ત્રં કાર્યસિદ્ધિદમ્ ।
કાર્યવશાદ્ગતવર્ણભેદઃ ।

ઇતિ વિંશત્યક્ષર મન્ત્રઃ સમાપ્તઃ પ્રણવસહિતઃ ।

kArtavIryaviMshatyakSharamantraH

Proofread by Manish Gavkar

---

*Kartavirya Vimshati Aksharamantrah*

pdf was typeset on October 28, 2025

Please send corrections to *sanskrit@cheerful.com*